# A-III/1/22APIS3CCTC1/23

## तृतीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-24)

## पुराणेतिहासः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. किमाख्यः राजा शक्रतुल्यपराक्रमः विष्णुभक्तश्चासीत् ?
2. पुरुषोत्तमक्षेत्रस्य परिमाणं किम् ?
3. दशयोजनविस्तीर्णस्य पञ्चयोजनमायतस्य क्षेत्रस्य नाम किम् ?
4. इन्द्रद्युम्नात् पूर्वकाले पुरुषोत्तमे का प्रतिमा आसीत् ?
5. मानवाः कां दृष्ट्वा निष्कामाः सन्तः श्वेताख्यं भवनं यान्ति ?
6. इन्द्रद्युम्नः विन्ध्याचलं प्रति कान् किमर्थञ्च प्रेषितवान् ?
7. "महासिन्धुतटे चैव कथं वैशातितो द्रुमः" इति कौ कं पृष्टवन्तौ ?
8. आषाढे मासि पुरुषोत्तमस्य जायमाना यात्रा का ?
9. कारुण्योदके रोहिणीकुण्डे स्नानस्य फलं किम् ?
10. समुद्रान्तर्व्यवस्थितं पञ्चक्रोशात्मकं क्षेत्रं किम् ?
11. विद्यापतिः कः ?
12. इन्द्रद्युम्नः केन साकं पुरुषोत्तमक्षेत्रं प्रति अगच्छत् ?
13. पुरुषोत्तमे पञ्चतीर्थानि कानि ?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. इन्द्रद्युम्नस्य भगवद्भक्तिं निर्द्धारितग्रन्थदिशा लिखत।
15. समुद्रस्नानविधिं समुपस्थापयत।

16. इन्द्रद्युम्नसरोवरमाहात्म्यं परामृशत।

17. गुडिचायात्राप्रसङ्गं यथाग्रन्थं लिखत।

18. प्रतिमोत्पत्तिं ब्रह्मपुराणदिशा वर्णयत।

19. प्रासादनिर्माणं मूर्तिप्रतिष्ठाञ्च वर्णयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. पुरुषोत्तमक्षेत्रमाहात्म्यं ब्रह्मपुराणदिशा निरूपयत।

21. इन्द्रद्युम्नस्य पुरुषोत्तमक्षेत्रयात्राप्रसङ्गं समालोचयत।

22. ब्रह्मस्कन्दपुराणयोः आधारेण पुरुषोत्तमक्षेत्रस्य साम्यं निरूपयत।

# A-III/2/22APIS3CCTC2/23

## तृतीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-25)

## पुराणेतिहासः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. श्रीमद्भागवतस्य एकादशस्कन्धे कुत्र भगवदवताराः प्रतिपादिताः?
2. चतुर्विंशतिः अवताराः के?
3. दशावतारेषु श्रीकृष्णः गृह्यते न वा?
4. श्रीरामः कस्मिन् युगे जन्म लब्धवान्?
5. नानावताराणां निधानं-बीजं किम्?
6. मेरुदेव्यां जातः भगवदवतारः कः?
7. सांख्यदर्शनस्य प्रवर्तनाय जातः अवतार कः?
8. इन्द्रारिव्याकुलं लोकं युगे युगे कः रक्षति?
9. भगवान् कल्किः कदा अवतरिष्यति?
10. वेदतरोः शाखाः कः किमर्थञ्च चक्रे?
11. भगवतः को अवतारः वेदमयः यज्ञमयः सर्वदेवमयश्च?
12. भगवान् हंसावतारं कदा जगृहे?
13. त्रिःसप्तकृत्वः पृथिवीं निःक्षत्रियां कः कृतवान्?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. पुरुषावतारं भावार्थदीपिकानुसारेण लिखत।
15. नरनारायणावतारं समालोचयत।

16. मत्स्य–कूर्म–वराहावताराणां प्रयोजनं यथाग्रन्थं वर्णयत।
17. वामनावताररहस्यं भागवतचन्द्रिकाधारेण लिखत।
18. नरसिंहावतारं पदरत्नावलीव्याख्यानुसारेण प्रतिपादयत।
19. कौमारसर्गं भावार्थदीपिकानुसारं विवेचयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. श्रीमद्भागवतदिशा भगवतः चतुर्विंशत्यवतारान् विवेचयत।
21. निर्धारितटीकाधारेण दशावतारान् प्रतिपादयत।
22. एकादशे स्कन्धे वर्णितान् भगवदवतारान् समुपस्थापयत।

# A-III/3/22APIS3CCTC3/23

## तृतीयसत्रार्द्धः

## तृतीयपत्रम् (DSCC-26)

## पुराणेतिहासः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. भिक्षुगीता कस्मिन् पुराणे समुपवर्णिता ?
2. विष्णुपुराणे का गीता समागता ?
3. गीतासारः कुत्र समुपवर्णितः ?
4. यमगीतोपदेशं कः कं प्रति अकरोत् ?
5. भुक्तिमुक्तिप्रदं गीतासारं केनोपदिष्टम् ?
6. विषयध्यानेन कुत्र सङ्गः जायते ?
7. यमगीता कस्मिन् कस्मिन् पुराणे समागता ?
8. अगस्त्यगीता कुत्र समुपवर्णिता ?
9. कूर्मपुराणे समागता गीता का ?
10. सर्वकर्माणि कः भस्मसात् कुरुते ?
11. बार्हस्पत्यः कः ?
12. पशुपालोपाख्यानं कुत्र समुपवर्णितम् ?
13. ईश्वरगीतायां कति अध्यायाः सन्ति ?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. गीतासारं प्रतिपादयत।
15. हंसगीतां ससन्दर्भं वर्णयत।

16. यमगीतां विष्णुपुराणदिशा निरूपयत।
17. ईश्वरगीतायाः परिचयं लिखत।
18. सात्त्विकपुराणेषु समागताः गीताः पर्यालोचयत।
19. महेश्वरोपदिष्टमात्मतत्त्वं प्रकाशयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. यमगीतायाः सारं यथाग्रन्थं विमृशत।
21. भिक्षुगीतां श्रीमद्भागवतदिशा प्रतिपादयत।
22. पुराणान्तर्गतानां गीतानां विवरणं लिखत।

# A-III/4/22APIS3CCTC4/23

## तृतीयसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-27)

## पुराणेतिहासः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. कति उपपुराणानि ?
2. कपिलपुराणे कति अध्यायाः सन्ति ?
3. बृहद्धर्मपुराणस्योपरि कस्य महापुराणस्य प्रभावः दृश्यते ?
4. स्कन्दमहापुराणस्य खण्डानि कानि ?
5. विष्णुपुराणस्यान्तर्विभाजनं कथम् ?
6. समेषां पुराणानां प्रतिपाद्यवस्तु कस्मिन् पुराणे समागतम् ?
7. मत्स्यपुराणे कतिसहस्रश्लोकाः विद्यन्ते ?
8. देवीभागवतं महापुराणमुपपुराणं वा ?
9. काशीरहस्यं कस्य पुराणस्य अंशभूतम् ?
10. कालिकापुराणस्य प्रतिपाद्यं किम् ?
11. पराशरोपपुराणे कति अध्यायाः विद्यन्ते ?
12. स्कन्दोपपुराणस्य वक्ता कः ?
13. उपपुराणानां नामविषये महापुराणानामैक्यमस्ति न वा ?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. नरसिंहपुराणस्य परिचयं लिखत।
15. विष्णुधर्मोत्तरपुराणं विमृशत।

16. साम्बपुराणस्य वर्ण्यविषयं निरूपयत।
17. भार्गवपुराणस्य वर्ण्यविषयं प्रभावञ्च लिखत।
18. गणेशोपपुराणं वर्ण्यविषयदिशा उपपादयत।
19. कालिकापुराणस्योपरि महापुराणप्रभावं वर्णयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. उपपुराणेषु महापुराणानां प्रभावं सोदाहरणं प्रतिपादयत।
21. उपपुराणानि वर्ण्यविषयाधारेण परामृशत।
22. आदिपुराणस्य वर्ण्यविषयं विलिख्य महापुराणप्रभावं विचारयत।